कर्पूराः । नारदः पारदः कुन्दखटिकास्फटिकादयः" ।

**शुक्लकण्ठ** पुंस्त्री० शुक्लः कण्ठो यस्य । दात्यूहखगे शब्द-माला । स्त्रियां ङीष् ।

**शुक्लकन्द** पु० शुक्लः कन्दो यस्य । १महिषकन्दे २अतिविषायां स्त्री राजनि० । कर्म० । ३श्वेते कन्दे ।

**शुक्लक्षीरा** स्त्री शुक्लं क्षीरं निर्यासो यस्याः । काकोल्यां राजनि० । [जटा० ।

**शुक्लकर्म्मन्** त्रि० शुक्लं शुद्धं कर्म यस्य । पवित्रे शुभचरित्रे

**शुक्लकुष्ठ** न० कर्म०। श्वेतकुष्ठे (धवल) । [निर्यासयुते त्रि० ।

**शुक्लदुग्ध** पु० शुक्लं दुग्धमस्य । १शृङ्गाटके शब्दच० २श्वेत-

**शुक्लधातु** पु० कर्म०। कठिन्यां (खाड़) हेमच० २श्वेतधातौ च

**शुक्लपक्ष** पु० कर्म० । १वृद्ध्यनुगुणचन्द्रकलाक्रियापञ्चदशकात्मके चान्द्रमासार्द्धे श्वेतच्छदे २वके पुंस्त्री०। स्त्रियां ङीष् ।

**शुक्लपुष्प** पु० शुक्लं पुष्पमस्य । १छत्राकवृक्षे २कुन्दवृक्षे ३मरु-वके च रत्नमा०। ४श्वेतपुष्पयुते त्रि०। ५नागदन्त्यां ६श्वेतकुम्भ्यां स्त्री रत्नमा० ङीप् । कर्म०। ७शुभ्रे पुष्पे न०।

**शुक्लपृष्ठक** पु० शुक्लं पृष्ठमस्य कप् । विल्वकवृक्षे शब्दच०।

**शुक्लयजुस्** न० कर्म० । इषेत्वेत्यादि चत्वारिंशदध्यायात्मके यजुर्वेदभेदे । [२तद्वति त्रि०। ३तथाभूतवृक्षे पु०राजनि०।

**शुक्लरोहित** पु० वर्णोवर्णेनेति कर्म० । १श्वेतरक्ते वर्णे

**शुक्लला** स्त्री शुक्लं लाति ला-क । उच्चटायां रत्नमा० ।

**शुक्लवायस** पुंस्त्री० कर्म० । १वके त्रिका० २श्वेतकाके च । स्त्रियां ङीष् ।

**शुक्लशाल** पु० कर्म० । १गिरिनिम्बे राजनि० २श्वेतवर्णवृक्षे च

**शुक्ला** स्त्री शुक्ल+अर्श आद्यच् टाप् । १सरस्वत्यां त्रिका० । २शर्करायां शब्दच० । ३काकोल्यां ४विदार्य्यां ५स्नुह्यां राजनि० । ६श्वेतवर्णवत्यां स्त्रियाञ्च ।

**शुक्लाङ्गी** स्त्री शुक्लमङ्गमस्याः ङीष् । १शेफालिकायां रा-जनि० । २श्वेताङ्गयुक्ते त्रि० । [स्त्रियां ङीष् ।

**शुक्लापाङ्ग** पुंस्त्री० शुक्लः अपाङ्गो यस्य । मयूरे हेमच० ।

**शुक्लाम्ल** न० कर्म० । अम्लशाके राजनि० ।

**शुक्लार्म्मन्** न० नेत्ररोगभेदे भावपु० ४४२८पृ० दृश्यम् ।

**शुक्लिमन्** पु० शुक्लस्य भावः इमनिच् । श्वेतवर्णे ।

**शुक्लोपला** स्त्री कर्म० स अस्त्यस्याः अच् । शर्करायां रत्नमा०

**शुङ्ग** पु० शम-ग तस्य नेत्त्वं नि० अत उत्वञ्च । १वटवृक्षे २आम्रातके ३शूके च मेदि० । ४पर्पटीवृक्षे ५धान्या-दिशूके च स्त्री राजनि० ।

**शुङ्गाकर्म्मन्** न० शुङ्गैः वटपल्लवैः क्रिया सम्यक् कर्म० यत्र । गर्भमात्रसंस्कारभेदे "पुंसवने चन्द्रनाम्ना शुङ्गाकर्मणि शोभनः" ति०त० । [२शुङ्गवति त्रि० ।

**शुङ्गिन्** पु० शुङ्गोऽस्त्यस्य इनि । १वटवृक्षे २प्लक्षवृक्षे जटा०

**शुच** शोके क्लेदे च दिवा० उभ० अक० सेट् । शुच्यति ते इरित् अशुचत्-अशोचीत् अशोचिष्ट ईदित् शुक्तः । अनु+किञ्चिद्दुःखेन पश्चात्तापे सक० । अनुशोचति ।

**शुच** शोके भ्वा० पर० सक० सेट् । शोचति अशोचीत् ।

**शुच्** स्त्री शुच-क्विप् । शोके अमरः । वा टाप् । तत्रैव ।

**शुचि** पु० शुच-कि । १वह्नौ २चित्रकवृक्षे ३आषाढ़मासे ४शृङ्गाररसे अमरः । ५ज्यैष्ठमासे मेदि० ६शुक्लाचरणे ७ग्रीष्मे ८ऋतौ ९शुद्धमन्त्रिणि मेदि० । १०अग्निभेदे "पावकः पवमानश्च शुचिरग्निश्च ते त्रयः । निर्मथ्यः पवमानः स्यात् वैद्युतः पावकः स्मृतः । यश्चाग्नौ तपते सूर्यः शुचिरग्निस्त्वसौ स्मृतः" कूर्मपु० १२अ०। ११श्वेत-वर्णे १२तद्वति त्रि० अमरः । शुचित्वञ्च शौचं शुद्धता वैदिककर्माहत्वप्रयोजकः संस्कारविशेषः । "शुचिस्तत्-कालजीवी कर्म कुर्य्यात्" स्मृतौ शौचस्य कर्माङ्गत्वं, स च स्नानादिजन्यः पुण्यभेदो वा । १३सूर्ये च "तपनस्तापन-श्चैव शुचिः सप्ताश्ववाहनः" सूर्यस्तवः । १४अर्कवृक्षे १५काश्यपपत्न्यास्ताम्रायाः कन्याभेदे स्त्री "षट्सुतास्तु महा-सत्त्वास्ताम्रायाः परिकीर्त्तिताः । शुकी श्येनी च भासी च सुग्रीवी शुचिगृध्रिके" गरुड़पु० ६अ० । १६शुद्धे १७अनुपहते त्रि० मेदि० ।

**शुचिद्रुम** पु० कर्म० । अश्वत्थवृक्षे राजनि० ।

**शुचिमल्लिका** स्त्री कर्म०। नवमल्लिकायां राजनि० ।

**शुच्य** स्नाने अक०अभिषवे मन्थने पीड़ने सन्धाने च सक०भ्वा० पर० सेट् ईदित् निष्ठा अनिट् । शुच्यति अशुच्यीत् ।

**शुटीर** पु० शौटीर+पृषो० । वीरे त्रिका० ।

**शुठ** गतिविघाते भ्वा०पर०अक० सेट् । शोठति अशोठीत् ।

**शुठ** आलस्ये चु०उभ०सक०सेट् । शोठयति ते अशूशुठत् त ।

**शुठ** शोधने वा चु० उभ० पक्षे भ्वा०पर० सक० सेट् इदित् । शुण्ठयति ते शुण्ठति अशुशुण्ठत् त अशुण्ठीत् ।

**शुण्ठि(ण्ठी)** स्त्री शुठि-इन् वा ङीप् । (शुँठ) शुष्कार्द्रके "शुण्ठी रुच्यामवातघ्नी पाचनी कटुका लघुः । स्नि-ग्धोष्णा मधुरा पाके कफवातविबन्धनुत् । हृद्या स्वर्य्या च निश्वासशूलकासहृदामयान् । हन्ति श्लीपदशोथार्श-स्तोयांश परिशोषयेत्" भावप्र० ।

**शुण्ठ्य** न० शठि-यत् । शुण्ठ्याम् शब्दच० ।